श्री सुब्रह्मण्य षोडशनाम स्तोत्रं

श्री सुब्रह्मण्य षोडशनाम स्तोत्रं

अस्य श्री सुब्रह्मण्य षोडशनामस्तोत्र महामंत्रस्य अगस्त्यो भगवानृषिः अनुष्टुप्छंदः सुब्रह्मण्यो देवता ममेष्ट सिद्ध्यर्थे जपे विनियोगः |

ध्यानं |
षड्वक्त्रं शिखिवाहनं त्रिनयनं चित्रांबरालंकृतं
शक्तिं वज्रमसिं त्रिशूलमभयं खेटं धनुश्चक्रकं |
पाशं कुक्कुटमंकुशं च वरदं हस्तैर्दधानं सदा
ध्यायेदीप्सितसिद्धिदं शिवसुतं स्कंदं सुराराधितं ||

प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कंद एव च |
अग्निगर्भस्तृतीयस्तु बाहुलेयश्चतुर्थकः || 1 ||

गांगेयः पंचमः प्रोक्तः षष्ठः शरवणोद्भवः |
सप्तमः कार्तिकेयश्च कुमारश्चाष्टमस्तथा || 2 ||

नवमः षण्मुखः प्रोक्तो दशमस्तारकांतकः |
एकादशश्च सेनानीः गुहो द्वादश एव च || 3 ||

त्रयोदशो ब्रह्मचारी शिवतेजश्चतुर्दशः |
क्रौंचदारी पंचदशः षोडशः शिखिवाहनः || 4 ||

षोडशैतानि नामानि यः पठेद्भक्तिसंयुतः |
बृहस्पतिसमो वाचि ब्रह्मतेजोयुतो भवेत् |
यद्यत्प्रार्थये मर्त्यस्तत्सर्वं लभते ध्रुवं || 5 ||

इति श्री सुब्रह्मण्य षोडशनाम स्तोत्रं |